# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – 29-01-2017 | अङ्काः–100

पूर्वाह्णे – 10-00 तः 1-00 पर्यन्तम् | समयः–घण्टात्रयम्

**सूचना : सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि ।**

**1 एकवाक्येन पञ्चप्रश्नानामुत्तराणि लिखत ।** 5

1. शङ्कर इति नाम कथं सार्थकमासीत् ?
2. राज्ञे कौत्सः कीदृशीमाशिषं ददौ ?
3. भगवतः सर्वात्मत्वं कथम् ?
4. अम्बरस्थश्चन्द्रः कथं बभ्राज ?
5. शृङ्गगिरौ शङ्करः किमपश्यत् ?
6. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?
7. पुण्यकृद्भिः किं लभ्यते ?

**2 पञ्चप्रश्नानामुत्तरं द्वित्रैः वाक्यैः लिखत ।** 10

1. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः ?
2. रघुः कौत्सं कथं प्रत्युज्जगाम ?
3. कुन्त्याः सेवया प्रीतो दुर्वासाः तां किमाह ?
4. शङ्करावतारसमये ग्रहाणां स्थितिः कीदृशी आसीत् ?
5. भगवतो विभूतिः कीदृशी ?
6. पाठप्रारम्भाय विलम्बमानं गुरुं पद्मपादः किमभ्यधात् ?
7. परोपकारिणां स्वभावः कः ? विशदयत ।

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

1. गिरिः गुरुसेवां कथं विदधौ ?
2. भगवता वेदव्यासेनोक्तं द्रौपद्याः पूर्ववृत्तं वर्णयत ।
3. रघोरौदार्यं विशदयत ।
4. कृष्णार्जुनाभ्यां पृष्टो विप्रवेषधारी वीतिहोत्रः तौ किमाह ?



पश्चादनुवर्तते

4 **वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

1. ''वत्से! मा शुचः। कञ्चित्कालमत्रैवाश्रमे वस ।''
2. ''स्त्रीणां निसर्गसिद्धा हि निपुणता ।''
3. ''गुप्तिमत्यन्तःपुरे कथं मम प्रवेशः स्यात् ।''
4. ''आवयोः सा–ामिकमुपकरणं सम्पादय ।''

5 **द्वयोः भावं विशदयत ।** 8

1. शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ।
   राज्यं समासाद्य यथा नरेन्द्रस्तथा प्रकाशो विरराज चन्द्रः ।।
2. पुत्रांस्ते बहुवयसो बहून् किमज्ञान् एकं वा लघुवयसं ददामि सूनुम् ।
   सर्वज्ञं तमिति शिवेन पृच्छ्यमानस्त्वस्त्वेकः सकलविदित्युवाच विप्रः ।।
3. निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्तः ।
   वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।।

6 **श्लोकं पूरयत ।** 4

1) यद्धात्रा ............................................ जलम्।।

2) एते ............................................... जानीमहे ।।

7 **एकस्य कवेः देशकालग्रन्थानधिकृत्य लिखत ।** 4

1) लक्ष्मणसूरिः

2) लक्ष्मणशास्त्री

8 **एकस्य लघुटिप्पणिं लिखत ।** 4

1) हस्तामलकाचार्यः 2) दमयन्ती

9 **चत्वारि पदानि वाक्ये योजयत ।** 4

1) स्तोकम् 2) विशाम्पतिः 3) जाम्बूनदम्

4) आदाय 5) संख्यावान् 6) शीतांशुः

10 **चतुर्णां रूपाणि विवेचयत ।** 4

1) पाराशर्यः 2) सुष्वाप 3) कवची
4) वृणीष्व 5) वर्त्मनि 6) शरीरिणाम्

11 **चतुर्णां पर्य्यायपदानि लिखत ।** 4

1) कुञ्जरः 2) मृगादनः 3) कुशाग्रबुद्धिः
4) जाम्बूनदम् 5) पुष्करः 6) मिहिरः

12 **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

1) स्त्रीपुंसौ 2) कुलवृद्धिः 3) कौशाम्बीनगरवासिनः
4) नलाक्रान्तहृदया 5) निर्वृत्तमङ्गलः 6) पाणिपादम्

13 **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

1) गच्छामस्तावत् 2) सहसागत्य 3) उभावपि
4) अधुनैव 5) अस्त्विति 6) मानुषोऽपि

14 **द्वयोः तत्तल्लकारं पुरुषत्रये रूपाणि लिखत ।** 6

1) त्यजेयम् 2) हन्मि 3) आरभत
4) विराजते 5) प्रयतस्व 6) दधौ

15 **द्वयोः व्याकरणविशेषं लिखत ।** 4

1) स्वस्त्यस्तु ते 2) वध्वा सहानेतुम् 3) यौगन्धरायणः
4) पार्थः 5) ऋते कृशानोः 6) उपतस्थिरे

16 **समासमेकं सलक्षणं सोदाहरणं च विशदयत ।** 4

1) कर्मधारयसमासः 2) तत्पुरुषः

17 **चतुर्थपदं लिखत ।** 4

1) गङ्गायाः अपत्यं – गाङ्गेयः :: कुन्त्याः अपत्यं —
2) अर्जुनः – कपिकेतनः :: दुर्योधनः —

 पश्चादनुवर्तते

3) वाल्मीकिः – श्रीमद्रामायणम् :: विद्वान् कृष्णशास्त्री —

4) रामलक्ष्मणौ – द्वन्द्वः :: दीर्घकेशाः —

**18** **इतरवचनानि लिखत ।** 4

| | | | |
|---|---|---|---|
| 1) | रोचताम् | — | — |
| 2) | — | — | अद्रिषु |
| 3) | फणिनं | — | — |
| 4) | — | अवधीतम् | — |

**19** **रिक्तस्थानानि पूरयत ।** 4

1) अस्ति ..................... नाम जनपदः ।

2) सन्दीप्ते भवने .................. कीदृशः ।

3) प्रारब्धं ............................ न परित्यजन्ति ।

4) जीवे ......................... सौख्यं कुतः ।

**20** **प्रयोगपरिवर्तनम् एकस्य कुरुत ।** 2

1) गुरुः माम् उक्तवान् ।

2) नलः हंसं सकृत् अपृच्छत् ।

* * * *

# श्रीसुरसरस्वतीसभा, शृङ्गेरि
## तुरीया परीक्षा
### द्वितीयपत्रिका

दिनाङ्कः – 29-01-2017 अङ्काः–50

अपराह्णे – 1-30 तः 3-00 पर्यन्तम् समयः–सार्धैकहोरा

**सूचना : सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि ।**

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत -** 4

1. प्रतिज्ञापालनम्
2. संस्कृतभाषायाः महत्त्वम्
3. श्रीशङ्कराचार्यः

**2 (अ) चतुर्थीविभक्तिं सोदाहरणं विवृणुत ।** 4

**(आ) तिङ्-प्रत्ययान् उदाहरणद्वारा स्पष्टीकुरुत ।** 4

**3 (अ) अर्थान्तरन्यासं सारालङ्कारं वा सोदाहरणं विशदयत ।** 4

**(आ) ''शैलाधिराजतनया न ययौ न तस्थौ'' एतस्य वृत्तं सलक्षणं सप्रस्तारं च निरूपयत ।** 4

**4 उत्तरं लिखत :–** 3

1. 'स्पृह्' धातोः योगे का विभक्तिः प्रयुज्यते ?
2. 'मध्यगुरुः' एष कः गणः इति लिखत ।
3. भावसूचकचिह्नं कदा उपयुज्यते ? उदाहरणेन स्पष्टीकुरुत ।

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत :–** 6

1. लब्धा 2. चक्रे 3. भूयात् 4. अयासीत्

**6 प्रयोगपरिवर्तनं कुरुत।** 4

1. मया अलज्ज्यत । 2. त्वमक्रीडः ।
2. तमो नश्यतु । 4. तौ उपविशतः ।



पश्चादनुवर्तते

7 **वाक्यदोषं परिहरत ।** 4

1. सः गृहे अध्यास्ते ।
2. भर्तुः साकं गता सीता ।
2. प्रजानां स्वस्ति ।
4. सः भाषणं विरमति ।

8 **टिप्पणीं लिखत । (एकस्य)** 3

1. विभक्तिविपर्ययः
2. निर्धारणषष्ठी - सप्तमी

9 **मातृभाषया अनुवदत ।** 5

1. अन्तरेण गुरुशुश्रूषां नावाप्यते विद्या ।
2. मोक्षसाधनानां भक्तिर्गरीयसी ।
3. गुरोः प्रसादेन विद्वांसो भूयास्म ।
4. इदं सर्वं वयं पूर्वमेव अवोचाम ।
5. सतीषु गोषु करभीं दोग्धुमिच्छति ।

10 **संस्कृतभाषया परिवर्तयत ।** 5

1. ದೇವತೆಗಳಲ್ಲಿ ಸರಸ್ವತಿಯನ್ನು ನಾನು ಪೂಜಿಸುತ್ತೇನೆ.
   Among all the goddesses I worship Saraswathi.
2. ಚಂದ್ರನು ಉದಿಸಲಾಗಿ ಕತ್ತಲೆ ನಶಿಸಿತು.
   Darkness disappeared as the moon rose up.
3. ನೀವು ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.
   May you live long.
4. ಅವರು ರಜಾದಿನಗಳಲ್ಲಿ ಹಳ್ಳಿಗೆ ಹೋಗುವರು.
   They will go to village during holidays.
5. ಬೆಂಕಿಯು ಉರಿದಿದ್ದರೆ ಅವಳು ಅಡಿಗೆಯನ್ನು ಮಾಡುತ್ತಿದ್ದಳು.
   If the fire would have burnt, she would have cooked.

* * * * *